# Shri Shankaraproktam Shivadharmanuvarnanam

# શ્રીશઙ્કરપ્રોક્તં શિવધર્માનુવર્ણનમ્

## Document Information

Text title : Shri Shankaraproktam Shivadharmanuvarnanam

File name : shivadharmAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 12 | vAvRittashlokAH ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# શ્રીશઙ્કરપ્રોક્તં શિવધર્માનુવર્ણનમ્

લિઙ્ગાર્ચકારાધકસેવકાન્ વા દૃષ્ટ્વા પ્રયત્નેન નતો નયેન ।
કૃતાઞ્જલિઃ સ્યાદત એવ મિત્રં યમો મદીયં ગિરિરાજકન્યે ॥ ૪૦॥

યન્મન્દિરે નાર્મદલિઙ્ગપૂજા તન્મન્દિરસ્થાન્ ન યમો ગવાદીન્ ।
વિલોક્ય દૂરાત્ પ્રણતોઽતિનમ્રઃ કરોતિ તસ્ય સ્તુતિમાદરેણ ॥ ૪૧॥

ધન્યં ગૃહં તસ્ય તદેવ તાવત્ પવિત્રમત્ર ત્રિપુરાન્તકસ્ય ।
લિઙ્ગં મનોજ્ઞં વસતીતિ મત્વા નમત્યયં મન્દિરમપ્યપારમ્ ॥ ૪૨॥

લિઙ્ગાલયં પશ્યતિ યઃ પ્રયત્નાત્તમેવ દૃષ્ટ્વા સ યમોઽતિભક્ત્યા ।
ધન્યોઽતિધન્યઃ સુતરાં સ ધન્યો માન્યો યમેતિ પ્રવદત્યવશ્યમ્ ॥ ૪૩॥

તન્મન્દિરં શઙ્કરમન્દિરત્વાત્ વૃન્દારવન્દ્યં મુનિવૃન્દવન્દ્યમ્ ।
તત્સર્વવન્દ્યં ભવતીતિ મત્વા પુનઃ પુનઃ સ પ્રણમત્યવશ્યમ્ ॥ ૪૪॥

યદઙ્ગે રુદ્રાક્ષાઃ સ તુ ભવતિ ભાલાક્ષ ઇતિ ધીઃ
વિભૂતેર્વા લેશો યદિ ભવતિ તત્ભાલફલકે ।
સકૃદ્વા મન્નામપ્રજપનપરા યસ્ય રસના
તમાલોક્યાલોક્ય પ્રણમતિ પુનર્નૃત્યતિ યમઃ ॥ ૪૫॥

પિબન્તિ યે વા શિવનામરૂપાં સુધાં મુહુસ્તાન્ પ્રણમત્યવશ્યમ્ ।
એતે મહેશપ્રિયવિગ્રહત્વાત્ પૂજ્યા ઇતિ સ્તૌતિ યમઃ સ ગૌરિ ॥ ૪૬॥

યસ્યૈવ મય્યવ્યભિચારિણી સ્યાત્ ભક્તિસ્તમાશુ પ્રણતોઽતિભક્ત્યા ।
સ્તૌતિ પ્રનૃત્યત્યપિ ગૌરિ નિત્યં સ એવ મિત્રં મમ નાત્ર ચિત્રમ્ ॥ ૪૭॥

લિઙ્ગાનિ યે વા રજનીમુખેષુ દૃષ્ટ્વા પ્રયત્નેન નમન્તિ ધીરાઃ ।
તાનાશુ દૃષ્ટ્વા પ્રણમત્યવશ્યં કાલસ્તદારાધનસક્તચિત્તાન્ ॥ ૪૮॥

ત્રિપુણ્ડ્રરુદ્રાક્ષધરાન્ વિલોક્ય દૂરાદપિ પ્રાઞ્જલિરેવ ભક્ત્યા ।
તાનાશુ દૃષ્ટ્વા પ્રણમત્યવશ્યં કાલસ્તદારાધનસક્તચિત્તાન્ ॥ ૪૯॥

યે પ્રાતરુત્થાય શિવં સ્મરન્તિ મામવ્યયં પાતકનાશહેતુમ્ ।
તાનાશુ દૃષ્ટ્વા પ્રણમત્યવશ્યં કાલસ્તદારાધનસક્તચિત્તાન્ ॥ ૫૦॥

કાશીપુરીદર્શનપૂતચિત્તાન્ શિવાર્ચનોત્પન્નસુખપ્રવાહાન્ ।
તાનાશુ દૃષ્ટ્વા પ્રણમત્યવશ્યં કાલસ્તદારાધનસક્તચિત્તાન્ ॥ ૫૧॥

મલ્લિઙ્ગપૂજાજનિતોત્સવા યે મલ્લિઙ્ગસન્દર્શનપાવનાશ્ચ ।
તાનાશુ દૃષ્ટ્વા પ્રણમત્યવશ્યં કાલસ્તદારાધનસક્તચિત્તાન્ ॥ ૫૨॥

- -

હે વિશ્વેશ્વર ચન્દ્રશેખર મહાદેવ સ્મરારે હર
શ્રીકણ્ઠ ત્રિપુરાન્તક ત્રિનયન શ્રીકાલકાલાવ મામ્ ।
દીનં મામિતિ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૫૮॥

ગૌરીવલ્લભ મન્મથાન્તકરિપો ભાલાક્ષ વિશ્વાધિક
શ્રીકણ્ઠ પ્રમથાધિપાવ ભગવન્ ઇત્યાદરાત્ સન્તતમ્ ।
દીનં મામિતિ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૫૯॥

યે ભર્ગ ત્રિદશાર્ચિતાઙ્ઘ્રિકમલ શ્રીપુઞ્જવિશ્રામભૂઃ
ભૂધારીશ્વરકન્યકાકુચગિરિશ્રીપૂરસારાદર ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૦॥

શમ્ભો નાર્મદતુઙ્ગલિઙ્ગનિલયામેય પ્રભો ધૂર્જટે
સંસારાર્તિભિષક્તમોત્તમ મહાદેવામરાધીશ્વર ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૧॥

રુદ્રાક્ષપ્રિય ભૂતિભૂષણ લસદ્બિલ્વીદલાભ્યર્ચિત
શ્રીશૂલિન્ મૃગશાવચિહ્નિતકરામ્ભોજામ્બુજારાધિત ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૨॥

શ્રી મૃત્યુઞ્જય કાલકણ્ઠ કરુણાસિન્ધો કપર્દિન્ વિભો
ભક્તાભીપ્સિતદાનલોલ લલિતાદેવીસમારાધિત ।

દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૩॥

શ્રીમન્મેરુશરાસનાતિરુચિરવ્યાપારસારાદર
સ્વામિન્ ચારુસુધાકરાર્ધઘટિત ભાકોટિપીતામ્બર ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૪॥

વિશ્વાધીશ્વર હે મહેશ્વર મહારુદ્રાન્તકારે હર
જ્ઞાનાનન્દઘનાનપાય વિલસત્સૌભાગ્યભાગ્યોદય ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૫॥

ભો શમ્ભો ભવ ભીમશઙ્કર હર વ્યોમાન્તકેશાનઘ
બ્રહ્માણ્ડોદયપાલનવ્યતિકરવ્યાપાર વિશ્વેશ્વર ।
દીનં મામવ યે વદન્તિ વિલસદ્રુદ્રાક્ષભૂતિપ્રભા-
સંવીતાઃ સુકૃતૈસ્ત એવ ગિરિજે કાલાર્ચિતાઃ કેવલમ્ ॥ ૬૬॥

મન્નામોત્સુકમાનસો મુહુરયં કાલઃ પ્રપશ્યત્યયં
મત્પૂજાનિરતાંશ્ચ પશ્યતિ મુહુર્ભસ્મત્રિપુણ્ડ્રાઙ્કિતાન્ ।
રુદ્રાક્ષાભરણાંશ્ચ તચ્ચરણજાન્ રેણૂન્ શિરસ્યાદરાત્
ધૃત્વા નૃત્યતિ શર્વ શઙ્કર મહાદેવેતિ શૈલાત્મજે ॥ ૬૭॥

મન્નામ સ્મૃતમેવ જીવનમિતિ જ્ઞાત્વા સ્મરત્યાદરાત્
મામીશં શિવમપ્રમેયવિભવં યે તે પરં શૈલજે ।
કૈલાસં સમુપેત્ય મત્પદરજઃ પુઞ્જૈઃ સહ ક્રીડનં
કુર્વન્ત્યુત્તમભૂતિભૂષિતમહારુદ્રાક્ષવક્ષઃસ્થલાઃ ॥ ૬૮॥

- -

ઉદ્ધૃત્યાદ્ય ભુજદ્વયં નિગદિતં લિઙ્ગાર્ચનં કેવલં
મોક્ષોપાયતયા શ્રુતં શ્રુતિશતૈસ્તેનૈવ મુક્તિઃ પરા ।
તત્ર સ્યાદધિકારિતાપિ ભસિનોદ્ધૂલનં સર્વથા
તેનૈવાનુલવં ત્રિપુણ્ડ્રરચના ભાલાદિકે બાલિકે ॥ ૮૭॥

યન્નામસ્મરણેન કેવલમુમે પ્રાણપ્રયાણેપ્સિતં
ભસ્માઙ્ગે કરકણ્ટકર્ણયુગલે રુદ્રાક્ષમાલા યદિ ।
મુક્તિઃ સ્યાદનપાયિની મમ સખા સ સ્યાન્મદીયં ધનં

સર્વં તસ્ય વશે સ કેવલમહં સત્યં ત્રિસત્યં શિવે ॥ ૮૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શ્રીશઙ્કરપ્રોક્તં શિવધર્માનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૨। વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 12. vAvRRittashlokAH ..

Proofread by Ruma Dewan

---

*Shri Shankaraproktam Shivadharmanuvarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*